श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवादिराजयति कृतम्

# ॥ श्रीहयग्रीवसम्पदास्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीहयग्रीवसम्पदास्तोत्रम् ॥

हयग्रीव हयग्रीव हयग्रीवेति वादिनम्।
नरं मुञ्चन्ति पापानि दरिद्रमिव योषितः॥ १ ॥

हयग्रीव हयग्रीव हयग्रीवेति यो वदेत्।
तस्य निस्सरते वाणी जह्नुकन्याप्रवाहवत्॥ २ ॥

हयग्रीव हयग्रीव हयग्रीवेति यो ध्वनिः।
विशोभते च वैकुण्ठकवाटोद्घाटन क्षमः॥ ३ ॥

श्लोकत्रयमिदं पुण्यं हयग्रीव पदाङ्कितं।
वादिराजयतिप्रोक्तं पठतां संपदां पदम्॥ ४ ॥

॥ इति श्रीहयग्रीवसम्पदास्तोत्रं सम्पूर्णम् ॥